2nd Sanskrit Olympiads (National Level)
The Enrichment of Communicative Sanskrit Language

# द्वितीय संस्कृत ओलम्पियाड्स् – 2016-17 D

स्तरः - 1

समयः - 60निमेषाः | नवमी कक्ष्या | अङ्काः 60

**अधःदत्तं गद्यांशं पठित्वा 1 तः 5 प्रश्नान् उत्तरत।**

"नमामि भारताम्बिकाम्", "मम देशो भारतम् " इत्यादीनि वचनानि वयं सर्वदा वदामः। तदा अस्माकं मनोभित्तौ भौगोलिकभारतं, विशालं सांस्कृतिकभारतं च दृश्येते। भारतपदस्य श्रवणात् मानससरोवरः, संस्कृतव्याकरणकर्ता पाणिनिः, तक्षशिला, काश्मीरवासिनी सरस्वती,सिन्धुसंस्कृतिः – इत्यादीनां स्मरणं च भवति। एषा भावना सद्योजाता न। सहस्राधिकवर्षेभ्यः भारतस्य स्वरूपम् एतदेव। एतत् सांस्कृतिकभारतम् अखण्डम्। तत् परिरक्षितुम् अनेकविधाः व्यवस्थाः अस्माकं पूर्वजैः परिकल्पिताः आसन्। शक्तिपीठानि, ज्योतिर्लिङ्गानि, कुम्भमेलादयः तीर्थस्थानानि – इत्यादयः प्रकल्पिताः। एतादृशीं सांस्कृतिकपरम्परां, तस्याः वैशिष्ट्यलक्षणं सर्वेषां भारतीयानां दायित्वम्। तत् अस्माकं मनोभिः सदा स्मरणीयम्।

1) अस्माकं सांस्कृतिकभारतम् ईदृशम्

अ) जटिलम् आ) विशालम् इ) कुटिलम् ई) सद्योजातम्

2) सांस्कृतिकपरिरक्षणार्थम् अनेकव्यवस्थाः एभिः कल्पिताः

अ) पण्डितैः आ) पाणिनिना इ)पूर्वजैः ई) काश्मीरवासिन्या

3) सद्योजाता नाम

अ) इदानीमेव आविर्भूता आ) पूर्वमेव आविर्भूता इ) सनातना ई) भविष्यकालः

4) मनोभित्तौ – इत्यत्र भित्तिर्नाम

अ) पेटिका आ) फलकम् इ) शिला ई) कुड्यम्

5) दायित्वं नाम

अ) आरोपितधर्मः आ) विध्युक्तधर्मः इ) आलस्यम् ई) धनसमर्पणम्

6) ध् + अ + न् + व् + अ + न् + त् + अ + र् + इः ---इत्येतेषां संयोजितपदम्

अ) धनुवन्तरिः आ) धनवन्तरिः इ) धन्वान्तरिः ई) धन्वन्तरिः

7) संस्कृतझरी – इत्यस्मिन् तालव्यम्

अ) र् आ) क् इ) त् ई) झ्

8) दन्तौष्ठ्याक्षरम् अस्मिन् पदे अस्ति।

अ) अनुरक्तिः आ) अणुशक्तिः इ) अनुपङ्कजम् ई) अनुपल्लवी

9) त्रिवेदी प्रातः3-45 समये उत्तिष्ठति। समयवाचकं चिनुत

अ) सपाद चतुर्वादन आ) पादोन चतुर्वादन इ) पादोन त्रिवादन ई) सपाद त्रिवादन

10) क)3-15 च)6-45 ट)9-38 त) 8-26 –समयमनुसृत्य एतेषां क्रमः -

अ) क त च ट आ) क च त ट इ) क त ट च ई) च क ट त

11) श्वः पादोन नववादने सभाकार्यक्रमः भविष्यति। पादोन नववादने इत्यस्य समयः

अ) 7-45 आ) 8-45 इ) 9-45 ई) 10-15

12) महादेवः भक्तान् -------------रक्षति।

अ) इति आ) पुरा इ) नूनम् ई) मा

13) सात्त्विकाहारः ----- न करणीयः

अ) मा आ) नूनं इ) वृथा ई) मा

14) उत्तमं कार्यम् --------करणीयम्।

अ) पुरा आ) वृथा इ) सहसा ई) मा

15) स्मृत्याम् – इत्यस्य विभक्तिः

अ) सप्तमी-एक.व आ) षष्ठी-बहु.व इ) द्वितीया-बहु.व ई) द्वितीया-एक.व

16) वाक् शब्दस्य सप्तमी बहुवचनम्

अ) वाक्षु आ) वचांसु इ) वाक्सु ई) वाचसु

17) अस्माभिः प्रकृतेः संरक्षणाय प्रयत्नः करणीयः। अत्र प्रकृतेः इत्यस्य विभक्तिः, वचनं च

अ) षष्ठी – एक.व आ) चतुर्थी – एक.व इ) पञ्चमी – बहु.व ई) सप्तमी – द्वि.व

18) मन्त्री वारं वारं -----------पृच्छति।

अ) राजानं आ) राजम् इ) राज्ञं ई) राज्ञां

19) चतुरः इत्यस्य ......................विभक्तिः ..................वचनं च ।

अ) प्रथमा – एक आ) प्रथमा – बहु इ) द्वितीया – बहु ई) द्वितीया - एक

20) मात्रा ---------------पुत्री आपणं गच्छति।

य ) भीत्या आ) ऋते इ) पुरतः ई) विना

21) सज्जनः -------- अपि स्निह्यति।

अ) शत्रौ आ) शत्रवे इ) शत्रोः ई) शत्रुम्

22) ग्रामात् -----सस्यक्षेत्राणि भवन्ति।

अ) परितः आ) ऋते इ) प्रति ई) बहिः

23) ऋषयः ----- विना जीवन्ति।

अ) आहाराय आ) आहारस्य इ) आहारः ई) आहारं

24) हरिणः -----बिभेति।

अ) व्याघ्रेण आ) व्याघ्रं इ) व्याघ्राय ई) व्याघ्रात्

25)  एतस्य नाम

अ) शूर्पः आ) दर्वी इ) वेल्लनी ई) घरट्टः

26)  एतस्य नाम

अ) तूर्यम्　　आ) वल्लकी　　इ) पणवः　　ई) मुरजः

27)  इत्यस्य चित्रस्य नाम

अ) शाटिका　　आ) वेल्लनी　　इ) स्मृतिका　　ई) द्रवाय्यः

28) एतेषु भिन्नं पदं चिनुत।

अ) व्यजनम्　　आ) राङ्कवम्　　इ) ऊरुकम्　　ई) युतकम्

29) जीवलक्षणमनुसृत्य एषः भिन्नप्राणी।

अ) मकरः　　आ) अजगरः　　इ) शतपदी　　ई) वृश्चिकः

30)शङ्करः, सञ्जीवश्च मिलित्वा पाठं -------------।

अ) पठिष्यावः　　आ) पठिष्यति　　इ) पठिष्यतः　　ई) पठेतम्

31) वृतु धातोः विधिलिङ् उत्तमैकवचनम्

अ) वर्तै　　आ) वर्ते　　इ) वर्तेय　　ई) वर्तेत

32) आगामि भानुवासरे अहं, सन्दीपश्च मिलित्वा आकाशवाण्यां संस्कृतसम्भाषणं --------------

अ) वदिष्यथः　　आ) वदतः　　इ) वदिष्यावः　　ई) वदिष्यतः

33) अहं,त्वं च मिलित्वा गुरुशिष्यसंवादम् ------------

अ) अभाषेथाम्　　आ) अभाषे　　इ) अभाषावहि　　ई) अभाषेताम्

34) पा धातोः लृट् मध्यम – बहुवचनम्

अ) पायस्व　　आ) पाश्यतः　　इ) पाश्यथ　　ई) पिबथ

35) लभ् धातोः लोट् उत्तमैकवचनम्

अ) लभे　　आ) लभेत　　इ) लभै　　ई) अलभे

36) रामो विग्रहवान् धर्मः इति लोकोक्तिः। रेखाङ्कितपदस्य प्रश्नवाचकः

अ) किम्　　आ) का　　इ) कः　　ई) कीदृक्

37) अश्वशालायाम् एकविंशति अश्वाः सन्ति। रेखाङ्कितस्य पदस्य प्रश्नवाचकः

अ) कति　　आ) कस्याम्　　इ) कुत्र　　ई) के

38) गतमासेषु वृष्टिः न्यूना आसीत् । रेखाङ्कितस्य स्थाने प्रश्नवाचकः

अ) कीदृशी　　आ) कति　　इ) कदा　　ई) किम्

39) निर्मला दूरं गन्तुं त्वरया उत्तिष्ठति। रेखाङ्कितस्य पदस्य प्रश्नवाचकः

अ) कुत्र　　आ) कुतः　　इ) कति　　ई) किमर्थम्

40) षडेते यत्र वर्तन्ते। रेखाङ्कितस्य सन्धिविच्छेदः -

अ) षट्+ऐते　　आ) षट+एते　　इ) षडे+एते　　ई) षट्+एते

41) सीतायाः पुनः+सङ्गात् रामः आनन्दं प्राप्तवान्। रेखाङ्कितस्य सन्धिपदम्

अ) पुनर्सङ्गात्　　आ) पुनासङ्गात्　　इ) पुनश्शङ्गात्　　ई) पुनस्सङ्गात्

42) वृक्षात् चटकः+ डयते । रेखाङ्कितस्य सन्धिपदम्

अ) चटकस्डयते　　आ) चटको डयते　　इ) चटकर्डयते　　ई) चटकः डयते

43) कार्यक्रमः+तु। रेखाङ्कितस्य सन्धिपदम्।

अ) कार्यक्रमोऽस्तु　　आ) कार्यक्रमास्तु　　इ) कार्यक्रम तु　　ई) कार्यक्रमस्तु

44) अजादि –इत्यस्य पदविच्छेदः

अ) अच+आदिः　　आ) अजः+आदि　　इ) अज+आदि　　ई) अच्+आदि

45) रामः+ स्निह्यति सुग्रीवे । रेखाङ्कितस्य सन्धिपदम्

अ) रामो स्निह्यति　　आ) रामस्स्निह्यति　　इ) राम स्निह्यति　　ई) रामः स्निह्यति

46) प्रार्थनसमये तौ बालकौ गीतं गीतवन्तौ । रेखाङ्कितस्य प्रत्ययः

अ) क्त आ) क्तवतु इ) क्त्वा ई) तुमुन्

47) नन्दिनी, मैथिली च पाठं पठिते। रेखाङ्कितपदे प्रत्ययः

अ) क्तवतु आ) क्त इ) शानच् ई) क्त्वा

48) कृषकाः कृषिकार्यं कृ+शतृ गीतं गायन्ति। प्रकृतिप्रत्ययसंयोजितपदम्

अ) कुर्वत्यः आ) कुर्वन्तः इ) कुर्वन् ई) कुर्वती

49) दृश्+तुमुन् इत्यस्य पदम्

अ) पश्यतुम् आ) दृष्टुम् इ) वीक्षितुम् ई) प्रदर्श्य

50) जनकः नूतनवस्त्राणि आ + नी + तुमुन् आपणम् अगच्छत्।

रेखाङ्कितानां प्रकृतिप्रत्यययोजितपदम्।

अ) आनीतुम् आ) आनेतुम् इ) आनाय्ययितुम् ई) आनीतम्

51) बलिष्ठैः ------कृषिकार्यं कर्तव्यम् ।

अ) वृषभेण आ) वृषभैः इ) वृषभाय ई) वृषभाभ्याम्

52) वृक्षे उत्तमे ---- -- स्तः

अ) पुष्पे आ) पुष्पाणि इ) पुष्पौ ई) पुष्पान्

53) अस्माकं प्राचीन-धार्मिकजीवन-व्यवस्था इदानीम् ------------

अ) दुर्लभा आ) दुर्लभः इ) अलब्धः ई) दुर्लभम्

54)---------------- लतासु पुष्पाणि विकसन्ति।

अ) दीर्घासु आ) उत्तमेषु इ) हरितानां ई) भवनेषु

55) एषा कृतिः न कालिदासस्य -

अ) अभिज्ञान शाकुन्तलम् आ) विक्रमोर्वशीयम् इ) किरातार्जुनीयम् ई) मेघसन्देशः

56) Helicopter Unit, Indian Air force ------ संस्थायाः ध्येयवाक्यम्

अ) अन्विष्य वेधी आ) साहसः फलति सर्वत्र इ) आपत्सु मित्रम् ई) सदैव निपुणः

57) ग्रीन् पार्क् क्रीडाप्राङ्गणम्...............नगरे विद्यते

अ) मुम्बई आ) विशाखपत्तन इ) कान्पूर् ई) हैदराबाद्

58) ऋषिपञ्चमी- अस्मिन् मासे आगच्छति

अ) आषाढे आ) भाद्रपदे इ) आश्वयुजे ई) माघे

59) सप्तसमुद्रेषु ...................अयं समुद्रः न अन्तर्भवति ।

अ) इक्षु समुद्रः आ) लवणसमुद्रः इ) कटुसमुद्रः ई) घृतसमुद्रः

60) रामबोला – इति अस्य बाल्यनाम

अ) स्वामी रामतीर्थस्य आ) दयानन्दसरस्वत्याः इ) तुलसीदासस्य ई) चैतन्यमहाप्रभोः

___________ 0________________